प्रश्वासयोर्गमनागमनाभ्यां सम्पाद्यते जप्+घ-र्थे कः स्त्रियां टाप् नजपा नञ्समासः।) हंसमन्त्रः। यथा,—

“वियदर्द्धेन्दुललितस्तदादिसर्गसंयुतः।
अजपाख्यो मनुः प्रोक्तो ह्यक्षरः सुरपादपः” ॥*॥

अस्य देवतार्द्धनारीश्वरमूर्त्तिः। यथा,—

“उद्यद्भानुस्फुरिततड़िदाकारमूर्द्धाम्बिकेशं
पाशाभीतिं वरदपरशुं संदधानं कराब्जैः।
दिव्याकल्पैर्नवमणिमयैः शोभितं विश्वमूलं
सौम्याग्नेयं वपुरवतु नश्चन्द्रचूड़ं त्रिनेत्रं” ॥

इति तन्त्रसारः ॥ * ॥ स्वाभाविकनिःश्वासप्रश्वासरूपेण जीवजप्यहंसमन्त्रः।

तथाच दक्षिणामूर्त्तिसंहितायां।

“अथ वक्ष्ये महेशानि प्रत्यहं प्रजपेन्नरः।
मोहबन्धं न जानाति मोक्षस्तस्य न विद्यते ॥
श्रीगुरोः कृपया देवि ज्ञायते जप्यते यदा।
उच्छ्वासनिःश्वासतया तदा बन्धक्षयो भवेत् ॥
उच्छ्वासैरेव निःश्वासैर्हंस इत्यक्षरद्वयं।
तस्मात् प्राणस्य हंसाख्य आत्माकारेण संस्थितः॥
नाभेरुच्छ्वासनिःश्वासात् हृदयाग्रे व्यवस्थितः।
षष्टिश्वासैर्भवेत् प्राणः षट्प्राणा नाड़िका मता॥
षष्टिनाड्या ह्यहोरात्रं जपसंख्याक्रमो मतः।
एकविंशतिसाहस्रं षट्शताधिकमीश्वरि ॥
जपते प्रत्यहं प्राणी सान्द्रानन्दमयीं परां।
उत्पत्तिर्जपमारम्भो मृत्युस्तत्र निवेदनं ॥
विना जपेन देवेशि जपो भवति मन्त्रिणः।
अजपेयं ततः प्रोक्ता भवपाशनिकृन्तनी” ॥

अन्यत्रापि।

“षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिं।
एतत्संख्यान्वितं मन्त्रं जीवो जपति सर्व्वदा”॥*॥

सन्ध्यावन्दनहीना। इति महाभारतं ॥

अजभक्षः, पुं, (अजानां भक्षः खाद्यः षष्ठीतत्पुरुषः। भक्ष+कर्म्मणि घञ्।) वर्व्वूरवृक्षः। इति राजनिर्घण्टः ॥

अजमीढ़ः, पुं, (अजः छागः यज्ञे मीढ़ः सिक्तो यत्र सः तद्देशाधिपः अजमीढ़+अण् संज्ञापूर्व्वकवृद्धेरनित्यत्वात् वृद्ध्यभावः।) राजा युधिष्ठिरः। इति त्रिकाण्डशेषः॥

अजमोदा, स्त्री, (अजानां खाद्यतया मोदो हर्षो यस्याः सा अजानां मोदो गन्ध इव गन्धो यस्याः सा) यवानिका। तत्पर्य्यायः। उग्रगन्धा २ ब्रह्मदर्भा ३ यवानिका ४ ॥ इत्यमरः। यमानी द्विविधा।

एका क्षेत्रयमानी सा अजमोदेत्येव ख्याता।
अपरा यमानीत्येव ख्याता। अविशेषात् द्वयोरपीति सुभूतिः ॥ केचित्तु अजमोदादिद्वयं वनयमान्यां। ब्रह्मदर्भादिद्वयं यमान्यामित्याहुः। उग्रगन्धाजमोदाख्या स्मृतक्षेत्रयमानिकेति। यमानी दीपको दीप्यो भूतिकश्च यमानिकेति च रत्नमाला ॥ इति भरतः ॥ * ॥ वैद्यके तु वनयमानी इति ख्याता। तत्पर्य्यायः। खराश्वा २ वस्तमोदा ३ मर्कटी ४ मोदा ५ गन्धदला ६ हस्तिकारवी ७ गन्धपत्रिका ८ मायूरी ९ शिखिमोदा १० मोदाढ्या ११ वह्निदीपिका १२ ब्रह्मकोशी १३ विशाली १४ हयगन्धा १५ उग्रगन्धिका १६ मोदिनी १७ फलमुख्या १८ विशल्या १९। अस्या गुणाः। कटुत्वं। उष्णत्वं। रूक्षत्वं। रुचिकारित्वं। कफवायुशूलाध्मानारुचिजठरामयनाशित्वञ्च। इति राजनिर्घण्टः ॥ यमानी। यथा,—

“अजमोदा खराश्वा च मयूरो दीप्यकस्तथा।
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तकः॥
अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत्।
उष्णा विदाहिनी हृद्या वृष्या बलकरी लघुः॥
नेत्रामयकृमिच्छर्द्दिहिक्कावस्तिरुजो हरेत्” ॥*॥

अथ खुरासानीयवानीनामगुणाः।

“पारसीययवानी तु यवानीसदृशी गुणैः।
विशेषात् पाचनी रूक्षा ग्राहिणी मादिनी गुरुः”॥

इति भावप्रकाशः ॥

अजमोदिका, स्त्री, (अजं मोदयति हर्षयति या। मुद+णिच् ण्वुल् स्त्रियां टाप्। अजस्य मोदिका षष्ठीतत्पुरुषः) यवानी। इति वैद्यकं ॥

अजम्भः, पुं, (न सन्ति जम्भा दन्ता यस्य सः) (सूर्य्ये च) भेकः। इति शब्दरत्नावली ॥ न सन्ति जम्भा दन्ता अस्य ॥

अजयः, पुं, (जि+भावे अच् न जयः नञ्समासः।) पराजयः। यथा,—

“सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ”।

इति भगवद्गीता ॥ राढ़देशप्रसिद्धनदविशेषः ॥

अजया, स्त्री, (न जीयते पराजीयतेऽसौ जि+कर्म्मणि अच् स्त्रियां टाप् न जया नञ्समासः।) विजया। भाङ्ग सिद्धि इति ख्याता। इति राजनिर्घण्टः ॥

अजय्यं, त्रि, (जेतुमशक्यं जि+कर्म्मणि “क्षय्य जय्यौ शक्यार्थे इति यत्” न जय्यं नञ्समासः।) जेतुमशक्यं। अजेयं। इति मुग्धबोधव्याकरणं ॥ (यथा रघुवंशे,—“राज्ञामजय्योऽजनि पुण्डरीकः”।)

अजरः, त्रि, (जॄ+भावे अङ् गुणः स्त्रियां टाप्, नास्ति जरा जीर्णावस्था यस्य सः) जरारहितः। वार्द्धक्यशून्यः। यथा,—

“अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत्”।

इति हितोपदेशः ॥

अजरा, स्त्री, (नास्ति जरा यस्याः सा।) जीर्णफञ्जीलता। वृद्धदारकप्रभेदः। गृहकन्या। घृतकुमारीति ख्याता। इति राजनिर्घण्टः ॥

अजर्य्यं, क्ली, (न जीर्य्यति जॄ+कर्त्तरि अजर्य्यं सङ्गतमिति सूत्रेण यत्। तेन सङ्गतमार्य्येण रामाजर्य्यं कुतमिति भट्टिः) सङ्गतं। सौहार्दं। इति हेमचन्द्रः ॥ अजरार्हे त्रि ॥ (यथा रघुवंशे,—

“मृगरजय्य जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध”।

अजलम्बनं, क्ली, (अज इव लम्ब्यते कृष्णवर्णत्वात् ज्ञायतेऽसौ लम्ब+कर्म्मणि ल्युट्) स्रोतोञ्जनं। इति शब्दचन्द्रिका ॥

अजलोमा, [न्] पुं, (अजस्य लोमेव लोम मञ्जरी यस्य सः) वृक्षविशेषः। गुयाशिषा। शूयाशिम्बी इति च भाषा। तत्पर्य्यायः। शिखी २ केशी ३ महाकृष्णा ४ अग्रपर्णी ५। इति रत्नमाला ॥

अजशृङ्गी, स्त्री, (अजस्य छागस्य शृङ्गमिव फलं यस्याः सा स्त्रियां ङीप्) वृक्षविशेषः। गाड़रशिङ्गी मेढ़ाशिङ्गी। इति ख्याता। तत्पर्य्यायः। विषाणी २। इत्यमरः ॥ विषाणिका ३ चक्रश्रेणी ४ अजगन्धिनी ५ मौर्व्वी ६ नेत्रौषधी ७ आवर्त्तिनी ८। इति रत्नमाला ॥ मेषशृङ्गी ९ वर्त्तिका १० सर्पदंष्ट्रिका ११ चक्षुष्या १२ तिक्तदुग्धा १३ पुत्रशृङ्गी १४ कर्णिका १५। अस्या गुणाः। कटुत्वं तिक्तत्वं। कफार्शःशूलशोथश्वासहृद्रोगविषरोगकासकुष्ठनाशित्वं। चक्षुर्हितकारित्वञ्च ॥ तत्फलस्य गुणाः। तिक्तत्वं। उष्णत्वं। कटुत्वं कफवायुनाशित्वं। जठरानलरुचिकारित्वं। हृद्यत्वं। लवणाम्लरसत्वञ्च। इति राजनिर्घण्टः ॥ (यथा सुश्रुते,—

“अजगन्धाश्वगन्धा च काला सरलया सह।
एकैषिकाजशृङ्गी च प्रलेपः श्लेष्मशोथहृत्” ॥

अजस्रं, क्ली, (नञ्+जस्+नमिकम्पिस्म्यजस इत्यादिना र नञ् समासः) निरन्तरं। सततं। इत्यमरः॥ (यथा रघुवंशे, “अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्त्तसे”।)

अजहत्स्वार्था, स्त्री, (न जहत् न त्यजन् स्वार्थो यां वृत्तिं यद्वा न जहती स्वार्थं या लक्षणा सा।) लक्षणाख्यवृत्तिविशेषः। उपादानलक्षणा। स्वीयार्थात्यागिनी लक्षणा। यथा। कुन्ताः प्रविशन्तीत्यत्र कुन्तधारिपुरुषे लक्षणा इत्यलङ्कारशास्त्रं ॥

अजहल्लिङ्गः, पुं, (न जहत् लिङ्गं यं शब्दं यद्वा न जहत् लिङ्गं यः शब्दः इति।) विशेषणभूतोऽपि स्वलिङ्गात्यागी शब्दः। इति व्याकरणं ॥

अजहा, स्त्री, (न जहाति परित्यजति शुकान्, अनुपसर्गाल्लिम्पविन्दधारिपारि वेद्येजिचेति सातिसाहिभ्यश्च इति पाणिनिसूत्रेण चकारस्य अनुक्तसमुच्चयार्थात् शः द्वित्वं नञ्तत्, स्त्रियां टाप्) शूकशिम्बी। इत्यमरटीकायां स्वामी ॥ अत्याज्ये त्रि ॥

अजा, स्त्री, (न जायते नोत्पद्यते अपि तु उत्पद्यते न+जन्+कर्त्तरि ड नञ् समासः। अत्र नञ्शब्दः शिरश्चालने। आद्याशक्तिपक्षे नञ्निषेधार्थः, अजामेकां लोहितशुक्लकृष्णां नमाम इति साङ्ख्यतत्त्वकौमुद्यां।) छागी। इत्यमरः ॥ माया। आद्या शक्तिः। इति पुराणं ॥ (“अजामेकां लोहितकृष्णशुक्लां बह्वीः प्रजाः सृजमानां सरूपाम् अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोग्यामजोऽन्यः”—इति श्वेताश्वतरोपनिषद्॥) ओषधिभेदः। (यथा सुश्रुते,—

“अजा महौषधी ज्ञेया शङ्खकुन्देन्दुपाण्डुरा”।)

अजागरः, पुं, (न जागरयति सेवनेन लोकान् निद्रापयति यः, जागृ+णिच् णायोऽविचिश्च